*** अधोलिखितानाम् प्रश्नानाम् उत्तराणि प्रदत्तविकल्पेभ्यः चित्वा लिखत।** **[12]**

1. डिजिटल पटले सम्पूर्णा का कुटुम्बवत् अस्ति?
   (A) अधुना (B) वसुधा (C) जनाः (D) भारतं

   **उत्तर :** (B) वसुधा
2. प्रधानमन्त्रिसङ्ग्रहालयः कुत्र स्थितः अस्ति?
   (A) महाराष्ट्रे (B) अजयमेरु (C) नवदेहली (D) जयपुरे

   **उत्तर :** (C) नवदेहली
3. भारत देशः कस्मिन् क्षेत्रे समृद्धम् अस्ति?
   (A) सांस्कृतिक (B) धार्मिक (C) आर्थिक (D) सामाजिक

   **उत्तर:** (A) सांस्कृतिक
4. अथर्वस्य पितरौ कस्य उपयोगं कुरुत?
   (A) डिजिलॉकर् (B) फ़ास्टॅग् (C) हॅालोग्राम् (D) जनधनयोजना

   **उत्तर :** (B) फ़ास्टॅग्
5. केन दिवङ्ता नेतारः अपि जीविताः इव दृश्यन्ते?
   (A) उमङ्गेन (B) ई-नामेन (C) डिजीलाकरणेण (D) हॅालोग्रामेन

   **उत्तर :** (D) हॅालोग्रामेन
6. दैनिकं जीवनं केन परिवर्तितं प्रभावितं च भवति?
   (A) डिजिटलेन (B) शिक्षणेन (C) समावेशेन (D) शासनेन

   **उत्तर:** (A) डिजिटलेन
7. अस्माभिः कस्मिन् विषये अपि चिन्तनीयम्?
   (A) साङ्गणनिक-सुरक्षा (B) अपराधेन (C) वाणिज्ये (D) स्वास्थ्य सन्दर्भे

   **उत्तर:** (A) साङ्गणनिक-सुरक्षा
8. ग्राम्यक्षेत्रे कस्य समस्या अस्ति?
   (A) स्वास्थ्यस्य (B) अन्तर्जालस्य (C) वाणिज्यस्य (D) अपराधस्य

   **उत्तर :** (B) अन्तर्जालस्य
9. भारत सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना अस्ति -
   (A) डिजिटल योजना (B) यूपीआय् (C) जनधन (D) फ़ास्टॅग्

   **उत्तर:** (A) डिजिटल योजना
10. यशिकायाः आधारपत्रं, विद्यालयीयं प्रमाणपत्रं कुत्र सुरक्षितम् अस्ति?
   (A) यूपीआय् (B) रूपे कार्ड (C) डिजिलॉकर् (D) फ़ास्टॅग्

   **उत्तर :** (C) डिजिलॉकर्

11. मम पितरौ 'फ़ास्टॅग्' इत्यस्य उपयोगं कुरुतः।

(A) अनेन राजमार्गेषु स्वचालित विधिना मार्गशुल्क सङ्ग्रहणं शीघ्रं भवति।

(B) अनेन शीघ्रं गन्तव्यम् प्राप्नोति।

(C) अनेन गति अवरोधः भवति।

(D) अनेन गति नियन्त्रिताः भवति।

**उत्तर:** (A) अनेन राजमार्गेषु स्वचालित विधिना मार्गशुल्क सङ्ग्रहणं शीघ्रं भवति।

12. डिजिटल योजनायाः प्रभावः दैनन्दिने जीवनेऽपि दृश्यते।

(A) दैनिक जीवने कोऽपि प्रभावः न दृश्यते।

(B) दैनिक जीवने डिजिटल योजनायाः प्रभावः दृश्यते।

(C) दैनिक जीवने डिजिटल योजना प्रभाविता न भवति।

(D) दैनिक जीवने योजनानां प्रभावोः यदा-कदा भवति।

**उत्तर :** (B) दैनिक जीवने डिजिटल योजनायाः प्रभावः दृश्यते।

*** अधोलिखित वाक्येषु रिक्तस्थानानि कोष्ठकेभ्यः उचित पदं चित्वा।** **[11]**

13. डिजिटल्-भारतस्य आर्थिकसमावेशनं सुगमं कर्तुं ________ प्रणाली अस्ति। (यूपीआय् / दीक्षा)

**उत्तर :** यूपीआय्

14. डिजिटल्-शासनं ________ सेवां प्रददाति। ( स्वचालितं पारदर्शकं च / जीवन)

**उत्तर :** स्वचालितं पारदर्शकं च

15. प्रधानमन्त्रिसङ्ग्रहालये हॉलोग्राम्-द्वारा ________ दृश्यते। (यूपीआय् / प्रधानमन्त्रिणः भाषणं)

**उत्तर :** प्रधानमन्त्रिणः भाषणं

16. अनेन भारतीयानां ________ अधिकं सरलं जायमानम् अस्ति। (जीवनात् / जीवनम्)

**उत्तर :** जीवनम्

17. ________ अपि हॉलोग्राम् दृष्टवती। (अहम् / वयम्)

**उत्तर :** अहम्

18. कृषिक्षेत्रे अपि डिजिटल ________ योगदानम् अस्ति। (भारतस्य / भारते)

**उत्तर :** भारतस्य

19. ग्राम्य क्षेत्रे अपि उच्चगतेः जालस्य उपलब्धिः ________ । (भविष्यति / अभवत्)

**उत्तर :** भविष्यति

20. ग्राम्य क्षेत्रे ________ समस्या अस्ति। (अन्तर्जालस्य / अन्तर्जालिकम्)

**उत्तर :** अन्तर्जालस्य

21. डिजिटल्-भारतस्य शिक्षाक्षेत्रे ________ नाम डिजिटल्-शैक्षिकमञ्चः अस्ति। (दीक्षा / प्रधानमन्त्रिणः भाषणं)

**उत्तर :** दीक्षा

22. भारतस्य डिजिटल्-परिवर्तनं सर्वाणि ________ क्षेत्राणि स्पृशति। (स्वचालितं पारदर्शकं च / जीवन)

**उत्तर :** जीवन

23. वयम् इमं प्रभावं ____________ इच्छामः। (ज्ञातुम् / खेलितुम्)

**उत्तर :** ज्ञातुम्

*** स्तम्भयोः मेलनं कुरुत।** **[12]**

| शब्दाः | अर्थाः |
|---|---|
| 24. त्वरया | (क) व्यापारः |
| 25. वाणिज्यम् | (ख) व्यवसायः |
| 26. आजीविका | (ग) करः |
| 27. शुल्कम् | (घ) शीघ्रण |

**उत्तर :** (1 - घ, 2 - क, 3 - ख, 4 - ग)

| शब्दाः | अर्थाः |
|---|---|
| 28. संवादः | (क) प्रवचनम् |
| 29. उत्सुकता | (ख) सहयोगः |
| 30. भाषणम् | (ग) जिज्ञासा |
| 31. योगदानम् | (घ) वार्तालापः |

**उत्तर :** (1 - घ, 2 - ग, 3 - क, 4 - ख)

| शब्दाः | संयोजनीयः शब्दः |
|---|---|
| 32. होलोग्राम् | (i) राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |
| 33. यूपीआय् (UPI) | (ii) डिजिटल्-प्रमाणपत्रम् |
| 34. डिजि-लॉकर् | (iii) शीघ्रं, सुरक्षितं, सुगमं च डिजिटल्-धनदेय प्रत्यर्पणम् |
| 35. फ़ास्टॅम् (FASTag) | (iv) आभासीया-वास्तविकता |

**उत्तर :**

| शब्दाः | संयोजनीयः शब्दः |
|---|---|
| 1. होलोग्राम् | (iv) आभासीया-वास्तविकता |
| 2. यूपीआय् (UPI) | (iii) शीघ्रं, सुरक्षितं, सुगमं च डिजिटल्-धनदेय प्रत्यर्पणम् |
| 3. डिजि-लॉकर् | (ii) डिजिटल्-प्रमाणपत्रम् |
| 4. फ़ास्टॅम् (FASTag) | (i) राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य शीघ्रं संग्रहणम् |

*** अधोलिखितानां प्रश्नानाम् एकपदेन उत्तरं लिखत।** **[15]**

36. कस्याः प्रभावः दैनन्दिनजीवने दृश्यते?

**उत्तर :** डिजिटल योजनायाः

37. प्रधानमन्त्रिसङ्ग्रहालये कीदृशी प्रौद्योगिकी प्रयुक्ता अस्ति?

**उत्तर :** हॉलोग्राम्

38. 'फ़ास्टॅग्' इत्यस्य उपयोगेन कस्य सङ्ग्रहणं भवति?

**उत्तर :** मार्गशुल्कस्य

39. भारत-सर्वकारस्य महत्त्वाकाङ्क्षिणी योजना का अस्ति?

**उत्तर :** डिजिटल् योजना

40. हॉलोग्राम्-द्वारा कस्य भाषणं दृश्यते?

**उत्तर :** प्रधानमन्त्रिणः

41. नवदेहल्यां सङ्ग्रहालयः कस्य स्थितः अस्ति?

**उत्तर :** प्रधानमन्त्रिः

42. हॉलोग्रामेन कीदृशाः नेतारः अपि जीविता इव दृश्यन्ते?

**उत्तर :** दिवङ्गताः

43. केन राजमार्गेषु शीघ्रं शुल्क सङ्ग्रहणं भवति?

**उत्तर :** फ़ास्टॅगेन

44. 'डिजिटल' इत्यस्य क्षेत्रं कीदृशम् अस्ति?

**उत्तर :** व्यापकम्

45. डिजिटल-प्रक्षेपण-चलच्चित्रं दृष्ट्वा का विस्मिता अभवत्?

**उत्तर :** वेदिका

46. दैनन्दिने जीवने कस्याः प्रभावः दृश्यते?

**उत्तर :** डिजिटल योजनायाः

47. भारतस्य काचित् महत्त्वाकाङ्क्षिणी योजना का अस्ति?

**उत्तर :** डिजिटल्-योजना

48. भास्करः कृत्रिमबुद्धि आधारितं किं दृष्टवान्?

**उत्तर :** संवाद्यन्त्रम्

49. के दर्शितानि विविधानि वस्तूनि उत्साहेन पश्यन्ति?

**उत्तर :** सर्वेबालाः

50. 'डिजिटल-भारतम्' इत्यस्य चर्चा कुत्र श्रूयते?

**उत्तर :** सम्पूर्णविश्वे

*** पूर्णवाक्येन उत्तरं लिखत। [28]**

51. जनाः किमर्थं साङ्गणनिक-अपराधेन पीडिताः भवन्ति?

**उत्तर :** जनाः प्रायशः लोभात् भयात् च साङ्गणनिक-अपराधेन पीडिताः भवन्ति।

52. प्रधानमन्त्रिसङ्ग्रहालये काः डिजिटल-प्रौद्योगिक्यः प्रदर्शिताः सन्ति?

**उत्तर :** प्रधानमन्त्रिसङ्ग्रहालये विविधाः डिजिटल-प्रौद्योगिक्यः दर्शिताः सन्ति।

53. यशिका 'डिजि-लॉकर्' इत्यस्य उपयोगं कथं करोति?

**उत्तर :** यशिका 'डिजि-लॉकर्' इत्यस्य उपयोगं आधारपत्रं विद्यालयीयं प्रमाणपत्रं च सुरक्षितं रक्षणाय करोति।

54. डिजिटल्-भारतस्य वित्तीयसमावेशने काः योजनाः सन्ति?

**उत्तर :** डिजिटल् भारतस्य वित्तीयसमावेशने जन-धन योजना, यूपीआय्, रूपे कार्ड इत्यादि योजना सन्ति।

55. ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या कथं निराकर्तुं शक्यते?

**उत्तर :** ग्राम्य-क्षेत्रेषु डिजिटल्-सेवानां समस्या उत्तम-इण्टरनेट-सुविधया निराकर्तुं शक्यते।

56. त्वरया धनं प्रेषयितुं का विधिः अस्ति?

**उत्तर :** त्वरया धनं प्रेषयितुं 'एकीकृत-धनदेय प्रत्यर्पण-अन्तरफलकस्य' (यूपीआय्) विधि अस्ति।

57. डिजिटल योजना कीदृशी योजना अस्ति?

**उत्तर :** डिजिटल-योजना भारतस्य महत्त्वाकाङ्क्षिणी योजना अस्ति।

58. डिजिटल योजनायाः लक्ष्यम् किम्?

**उत्तर :** राष्ट्रं डिजिटलरूपेण सुशक्तं भवेत् इत्येव अस्याः योजनायाः लक्ष्यम्।

59. वित्तीय समावेशने क्षेत्रे के के साधनानि सन्ति?

**उत्तर :** वित्तीय समावेशने क्षेत्रे यूपीआय्, रुपे-कार्ड, जनधनयोजना इत्यादीनि बहूनि साधनानि सन्ति।

60. सर्वकारः कस्य विस्ताराय कार्यं करोति?

**उत्तर :** सर्वकारः अन्तर्जालस्य विस्ताराय कार्यं करोति।

61. आभासीयं (ऑन्-लैन) विक्रयणं केन आधारितं भवति?

**उत्तर :** आभासीयं (ऑन्-लैन) विक्रयणं ''आशु-प्रतिक्रिया-कूट'' (QR Code) इत्याधारितः विनिमय भवति।

62. वयं सर्वे किमर्थं प्रयत्नं करिष्यामः?

**उत्तर :** वयं सर्वे भारतं डिजिटल-भारतं कर्तुं प्रयत्नं करिष्यामः।

63. 'ई-शासनपटलम्' इत्यस्य अन्तर्गतं किं किम् सन्ति?

**उत्तर :** ई-शासनपटलम् इत्यस्य अन्तर्गतं उमङ्ग, माय-गव्, जेम् इत्यादयः सन्ति।

64. डिजिटल्-भारते शिक्षायाः क्षेत्रे केषां पटलानाम् उपयोगः करणीयः?

**उत्तर :** डिजिटल्-भारते शिक्षायाः क्षेत्रे 'दीक्षा', 'स्वयं', 'स्वयं-प्रभा', 'ई-पाठशाला', 'भारतीय-राष्ट्रिय-डिजिटल्-पुस्तकालयः', 'निष्ठा', 'पीएम-ई-विद्या', निःशुल्क डिजिटल् शैक्षिकमंचः इत्यादीनाम् पटलानाम् उपयोगः करणीयः।

*** रेखाङ्कित पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत।** **[6]**

65. एषा <u>भारतसर्वकारस्य</u> विशिष्टा महत्त्वाकाङ्क्षिणी योजना अस्ति।

**उत्तर :** एषा **कस्य** विशिष्टा महत्त्वाकाङ्क्षिणी योजना अस्ति?

66. <u>पितरौ</u> फ़ास्टॅग् इत्यस्य उपयोगं कुरुतः।

**उत्तर : कौ** फ़ास्टॅग् इत्यस्य उपयोगं कुरुतः?

67. प्रत्यक्षमेव <u>प्रधानमन्त्रिः</u> अत्र उपविष्टः इव भासते।

**उत्तर :** प्रत्यक्षमेव **कः** अत्र उपविष्टः इव भासते?

68. सङ्ग्रहालयस्य अद्भुतः अनुभवः प्राप्तः।

**उत्तर :** सङ्ग्रहालयस्य **कीदृशः** अनुभवः प्राप्तः?

69. राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य संग्रहणमं शीघ्रं भवति।

**उत्तर : कुत्र** स्वचालितविधिना मार्गशुल्कस्य संग्रहणमं शीघ्रं भवति?

70. अधुना आपणेषु वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति।

**उत्तर :** अधुना **कुत्र** वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति?

*** अधोलिखित गद्याश पठित्वा प्रश्नानाम् उत्तराणि लिखत।** **[42]**

71. सर्वे छात्राः - अहो! सङ्ग्रहालयस्य अद्भुतः अनुभवः प्राप्तः।

अध्यापकः - बालाः! अस्मिन् सङ्ग्रहालये उपस्थापितं ज्ञानम् अद्भुतम् एव। 'डिजिटल्' योजनायाः प्रभावः दैनन्दिने जीवनेऽपि दृश्यते।

सर्वे छात्राः - आम्, मान्यवर! वयम् इमं प्रभावं ज्ञातुम् इच्छामः।

अध्यापकः - उत्तमम्। अस्माकं दैनिकं जीवनं 'डिजिटल्' इत्यनेन परिवर्तितं प्रभावितं च भवति। अस्य क्षेत्रं व्यापकम् अस्ति। यथा- 'डिजिटल्-शासनं, स्वास्थ्यसेवा, शिक्षणं, वित्तीयं समावेशनम्' इत्यादीनि क्षेत्राणि।

यशिका - अहं स्वयं 'डिजि-लॉकर्' इत्यस्य उपयोगं करोमि। मम आधारपत्रं विद्यालयीयं प्रमाणपत्रं च तत्र सुरक्षितम् अस्ति।

अथर्वः - मम पितरौ 'फ़ास्टॅग्' इत्यस्य उपयोगं कुरुतः। अनेन राजमार्गेषु स्वचालितविधिना मार्गशुल्कस्य सङ्ग्रहणं शीघ्रं भवति।

भास्करः - अहम् 'एकीकृत-धनदेयप्रत्यर्पण-अन्तरफलकस्य' (यूपीआय्) उपयोगं करोमि। अनेन मम पितरौ अपि त्वरया मह्यं धनं प्रेषयितुं शक्नुतः।

अध्यापकः - उत्तमम्! वित्तीयसमावेशनस्य क्षेत्रे 'यूपीआय्, रूपे-काई, जनधनयोजना' इत्यादीनि बहूनि साधनानि सन्ति। अधुना आपणेषु वस्तुक्रयणार्थं साक्षात् मुद्रायाः आवश्यकता नास्ति। मुद्रारहित-विनिमयसन्दर्भे विश्वे भारतस्य अग्रगण्यं स्थानम् अस्ति।

राघवः - डिजिटल्-योजना भारतस्य काचित् महत्त्वाकाङ्क्षिणी योजना अस्ति।

I. एकपदेन उत्तरत -

(i) सर्वे छात्राः कुत्र अद्भुतः अनुभवः प्राप्तः?

(ii) पितरौ कस्य उपयोगं कुरुत?

II. पूर्णवाक्येन उत्तरत -

(i) डिजिटल योजनायाः प्रभावः कुत्र दृश्यते?

(ii) अस्माकं दैनिकं जीवनं केन परिवर्तितं प्रभावितं च भवति?

III. निर्देशानुसारम् उत्तरत -

(i) अनेन राजमार्गेषु स्वचालित विधिना मार्ग शुल्कस्य सङ्ग्रहणं शीघ्रं भवति। रेखांकित पदे का विभक्तिः ?

(अ) पञ्चमी (ब) षष्ठी (स) सप्तमी (द) तृतीया

(ii) मम पितरौ 'फ़ास्टॅग्' इत्यस्य उपयोगं कुरुतः। वाक्यऽस्मिन् रेखांकित पदे कः समासः?

(अ) द्वन्द्व (ब) द्विगु (स) अव्ययीभाव (द) तत्पुरुष

(iii) 'मन्दम्' इत्यस्य विलोमपदं गद्यांशे किं?

(अ) स्थानम् (ब) शीघ्रं (स) क्षेत्रे (द) मम

**उत्तर :** I. (i) सङ्ग्रहालये

(ii) फ़ास्टॅग्

II.(i) डिजिटल योजनायाः प्रभावः दैनन्दिने जीवने दृश्यते।

(ii) अस्माकं दैनिकं जीवनं 'डिजिटल' इत्यनेन परिवर्तितं प्रभावितं च भवति।
III. (i) (स) सप्तमी
(ii) (अ) द्वन्द्व
(iii) (ब) शीघ्रं

72. अध्यापकः - आभासीय-पटलम् अनुप्रयोगः च इत्येतयोः माध्यमेन आभासीयं (ऑन्-लैन् ) विक्रयणं भवति। 'आशु-प्रतिक्रिया-कूटः' (QR Code) इत्याधारितः विनिमयश्च भवति।
सर्वे - वयं धन्याः मान्यवर! अस्मिन् सन्दर्भे वयं भवद्भिः पाठिताः। वयम् अपि भारतं डिजिटल्-भारतं कर्तुं प्रयत्नं करिष्यामः।
अध्यापकः - उत्तमम्। किन्तु अस्माभिः 'साङ्गणिक-सुरक्षा'-विषये अपि चिन्तनीयम्। अनेकविधाः साङ्गणिक-अपराधाः भवन्ति। जनाः प्रायशः लोभात् भयात् वा साङ्गणिक-अपराधेन पीडिताः भवन्ति।
भास्करः - एतस्मिन् विषये जनाः जागृताः भवेयुः तदर्थम् अपि उपायाः चिन्तनीयाः।
अध्यापकः - सत्यं कथितम्! अनेन प्रकारेण डिजिटल्-क्रान्तौ भारतम् अग्रगण्यं राष्ट्र भविष्यति।
सर्वे - कृतज्ञाः वयं गुरुवर! वयं डिजिटल्-भारतं समृद्धं कर्तुं योगदानं करिष्यामः।
(सर्वे मिलित्वा गायन्ति )
सर्वं विकसितं भाति डिजिटल्-भारतेऽधुना।
जीवनस्य च सौकर्यं सहसा लभते जनः॥
I. एकपदेन उत्तरत -
(i) ऑन्-लेन् विक्रमणे किं साधनं प्रयुक्तम्?
(ii) साङ्गणिकापराधस्य मुख्यं कारणं किम्?
II. पूर्णवाक्येन उत्तरत -
(i) सर्वे मिलित्वा डिजिटल-भारतस्य विषयम् किं गायन्ति?
(ii) सर्वे छात्राः गुरुवरं किं कथयन्ति ?
III. निर्देशानुसारम् उत्तरत -
(i) 'अस्मिन् संदर्भे वयं भवद्भिः पाठिताः।' वाक्येऽस्मिन् कर्तृ पदं किम् ?
(अ) अस्मिन् (ब) वयं (स) भवद्भि (द) पाठिताः
(ii) जनाः साङ्गणिक-अपराधेन <u>पीडिताः</u> भवन्ति। रेखांकित पदे कः लकारः?
(अ) लट् (ब) लोट् (स) लृट् (द) लङ्ग
(iii) वयं डिजिटल-भारतं समृद्धं कर्तुं योगदानं करिष्यामः। वाक्येऽस्मिन् क्रियापदं किम्?
(अ) समृद्धं (ब) कर्तु (स) योगदानं (द) करिष्यामः

**उत्तर :** I. (i) आभासीपटलम्
(ii) लोभः/भयम्
II. (i) सर्वं विकसितं भाति डिजिटल-भारते जीवनस्य सौकर्यं सहसा लभते जनः।
(ii) सर्वे छात्राः गुरुवरं कथयन्ति यत् वयं डिजिटल-भारतं समृद्धं कर्तुं योगदानं करिष्यामः।
III. (i) (ब) वयं
(ii) (अ) लट्
(iii) (द) करिष्यामः

73. अध्यापकः - आम् राघव! एषा भारतसर्वकारस्य विशिष्टा महत्त्वाकाङ्क्षिणी योजना अस्ति। राष्ट्र डिजिटल्-रूपेण सुशक्तं भवेत् इत्येव अस्याः योजनायाः लक्ष्यम्। डिजिटल्-शक्तिः सर्वजनान् सुशक्तान् कुर्यात् इति अस्माकं ध्येयम्।
श्रेया - महोदय! अस्य स्वरूपं किञ्चित् स्पष्टीकरोतु।
अध्यापकः - अवश्यम्! पश्य, डिजिटल्-शासन-सेवायाः अन्तर्गतं 'डिजी-लॉकर्' (आधार-पॅन्-काई इत्यादीनां

डिजिटल्-सङ्ग्रहणम्), 'ई-शासन-पटलम्' यथा - 'उमङ्ग्' (UMANG), 'माय-गव्' (My-Gov), 'जेम्' (GeM) इत्यादयः। ऑन्-लैन्-टीकाकरण-पञ्जीकरणार्थं 'कोविन्-पटलम्' (COWIN) अस्ति।

यशिका - किन्तु यदि ग्राम्य-क्षेत्रे अन्तर्जालस्य समस्या अस्ति तर्हि तत्र कथम् एतासां सेवानाम् उपयोगः भविष्यति ?

I. एकपदेन उत्तरत -

(i) ग्राम्य क्षेत्रे कस्य समस्या अस्ति?

(ii) आधार-पेन-कार्ड् इत्यादीनां डिजिटल्-संग्रहणम् किं कथ्यते?

II. पूर्णवाक्येन उत्तरत -

(i) डिजिटल-भारत योजनायाः लक्ष्यं किम्?

(ii) 'डिजिटल-शक्ति' इति शब्देन किं बोध्यते?

III. निर्देशानुसारम् उत्तरत -

(i) 'एतासां सेवानाम् उपयोगः भविष्यति।' वाक्येऽस्मिन् क्रियापदं किम्?

(अ) एतासां (ब) सेवानाम् (स) उपयोगः (द) भविष्यति

(ii) अस्य स्वरूपं किंचित् स्पष्टीकरोतु। वाक्ये अस्मिन् कर्तृपदे किम् ?

(अ) अस्य (ब) स्वरूपं (स) किंचित् (द) करोतु

(iii) 'संसार' इति पदस्य समानार्थकं पदं गद्यांशे किं प्रयुक्तम्?

(अ) टीकाकरणं (ब) अन्तर्जालम् (स) सेवायाम् (द) क्षेत्रम्

**उत्तर :** I. (i) अन्तर्जालस्य

(ii) डिजी-लॉकर्

II. (i) डिजिटल भारत योजनायाः लक्ष्यं राष्ट्र डिजिटल रूपेण सुशक्तं भवेत्, डिजिटल-शक्तिः सर्वजनान् सुशक्तान् कर्तुं अस्ति।

(ii) 'डिजिटल-शक्ति' इति शब्देन नागरिकानां डिजिटल क्षेत्रे सामर्थ्यं ज्ञानं च बोध्यते।

III. (i) (द) भविष्यति

(ii) (अ) अस्य

(iii) (ब) अन्तर्जालम्

74. अस्माकं देशः भारतं न केवलं सांस्कृतिकक्षेत्रे समृद्धम्, अपि तु नित्यम् आविष्कारैः कीर्तिं लभते। अद्य सम्पूर्णविश्वे 'डिजिटल्-भारतम्' इत्यस्य चर्चाँ श्रूयते। एकस्यैव पिञ्जस्य नोदनेन सर्वं नागरिक-सौविध्यं लभ्यते। अनेन भारतीयानां जीवनम् अधिकं सरलं जायमानम् अस्ति। डिजिटल्-पटले सम्पूर्णा वसुधा कुटुम्बवत् अस्ति । अधुना वयं भारतस्य डिजिटल्-प्रगतेः विषये पठामः।

(नवदेहलीस्थः प्रधानमन्त्रिसङ्ग्रहालयः। अत्र विविधाः डिजिटल्-प्रौद्योगिक्यः प्रदर्शिताः सन्ति। सर्वे उत्सुकतया सङ्ग्रहालये प्रदर्शितानि वस्तूनि पश्यन्ति।)

अध्यापकः - बालाः! प्रधानमन्त्रिसङ्ग्रहालये युष्माकं सर्वेषां स्वागतम्। अत्र विविधाः डिजिटल्-प्रौद्योगिक्यः प्रयुक्ताः सन्ति। सानन्दं सावधानं च पश्यन्तु। अनन्तरं एतस्योपरि चर्चाँ करिष्यामः।

( सर्वे बालाः प्रदर्शितानि विविधानि वस्तूनि उत्साहेन पश्यन्ति, अनुभवन्ति, परस्परं चर्चाम् अपि कुर्वन्ति।)

I. एकपदेन उत्तरत -

(i) अस्माकं देशस्य नाम किं?

(ii) डिजिटल पटले का सम्पूणाँ कुटुम्बवत् अस्ति?

II. पूर्णवाक्येन उत्तरत -

(i) अद्य सम्पूर्ण विश्वे कस्य चर्चा श्रूयते?

(ii) अध्यापकः कुत्र सर्वेषां बालानां स्वागतम् करोति?

III. निर्देशानुसारम् उत्तरत -

(i) 'प्रतिदिनम्' इत्यस्य समानार्थकं पदं गद्यांशे किम्?

(अ) नित्यम् (ब) चर्चा (स) श्रूयते (द) अद्य

(ii) "अधुना वयं भारतस्य डिजिटल-प्रगतेः विषये पठाम्" वाक्येऽस्मिन् कर्ता पदं किम्?

(अ) अधुना (ब) वयम् (स) भारतस्य (द) विषये

(iii) अनन्तरं एतस्योपरि चर्चा करिष्यामः। रेखांकित पदे लकार वर्तते -

(अ) लट् (ब) लोट् (स) लृट् (द) लङ्ग

**उत्तर :** I. (i) भारतं

(ii) वसुधा

II. (i) अद्य सम्पूर्णविश्वे 'डिजिटल् भारतम्' इत्यस्य चर्चा श्रूयते।

(ii) अध्यापकः प्रधानमन्त्रिसङ्ग्रहालये सर्वेषां बालानां स्वागतं करोति।

III. (i) (अ) नित्यम्

(ii) (ब) वयम्

(iii) (स) लृट्

75. श्रेया - मान्यवर! मया श्रुतं यत् सर्वकारः अन्तर्जालस्य उत्तरोत्तरं विस्ताराय कार्यं करोति। अनेन ग्राम्य-क्षेत्रे अपि उच्चगतेः जालस्य उपलब्धिः भविष्यति।

भास्करः - बहु समीचीनम्। एतासां सेवानाम् उपयोगः शिक्षायाः माध्यमेन अधिकाधिकं प्रचारणीयः।

अध्यापकः - सत्यम्! शिक्षायाः क्षेत्रे 'दीक्षा' (DIKSHA), 'स्वयम्' (SWAYAM), 'स्वयं-प्रभा' (SWAYAM PRABHA), 'ई-पाठशाला' (ePathshala), 'भारतीय-राष्ट्रिय-डिजिटल्-पुस्तकालयः', 'निष्ठा' (NISHTHA), 'पीएम्-ई-विद्या' (PM e-VIDYA), निःशुल्क-डिजिटल्-शैक्षिकमञ्चः इत्यादीनाम् उपयोगः करणीयः।

अथर्वः - आचार्य! किं कृषिक्षेत्रे अपि डिजिटल्-भारतस्य योगदानम् अस्ति ?

अध्यापकः - आम्! 'ई-नाम्' (e-NAM), 'पीएम्-किसान्-अनुप्रयोगः' (PM KISAN), ड्रोन्-प्रौद्योगिकी इत्यादीनि पटलानि सन्ति।

यशिका - बहु सम्यक्। किन्तु 'डिजिटल्' इत्यस्य वाणिज्ये कीदृशः प्रभावः अस्ति?

I. एकपदेन उत्तरत -

(i) सर्वकारः कस्य उत्तरोत्तरं विस्ताराय कार्यं करोति?

(ii) कृषिक्षेत्रे डिजिटलभारतस्य किमपि एकं योगदानं ब्रूहि।

II. पूर्णवाक्येन उत्तरत -

(i) ग्राम्य-क्षेत्रेषु अन्तर्जालस्य लाभः किम्?

(ii) शिक्षाक्षेत्रे के के कार्यक्रमाः उपयुज्यन्ते?

III. निर्देशानुसारम् उत्तरत -

(i) 'व्यापारः' इत्यस्य पदस्य कृते गद्यांशे किं पदं प्रयुक्तम्?

(अ) वाणिज्यः (ब) अनुप्रयोगः (स) उपयोगः (द) ग्राम्यः

(ii) 'निःशुल्क-डिजिटल-शैक्षिकमंचः इत्यादीनाम उपयोग करणीय।' वाक्येऽस्मिन् क्रियापदं किम् ?

(अ) डिजिटल (ब) शैक्षिकमंच (स) उपयोग (द) करणीय

(iii) 'असत्यम्' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(अ) निष्ठा (ब) क्षेत्रम् (स) सत्यम् (द) योगदानम्

**उत्तर :** I. (i) अन्तर्जालस्य

(ii) ड्रोन-प्रौद्योगिकी

II. (i) ग्राम्यक्षेत्रेषु अन्तर्जालस्य लाभः अस्ति यत् नागरिकाः विविध-डिजिटल-सेवायाः सहजतया उपयुज्यन्ते।

(ii) शिक्षा क्षेत्रे 'दीक्षा', 'स्वयम्', 'स्वयं-प्रभा', 'ई-पाठशाला', 'भारतीय-राष्ट्रिय-डिजिटल-पुस्तकालयः', 'निष्ठा', पीएम्-ई-विद्या इत्यादि कार्यक्रमाः उपयुज्यन्ते।

III. (i) (अ) वाणिज्यः
(ii) (द) करणीय
(iii) (स) सत्यम्

76. सर्वे छात्राः - अद्भुतं महोदय! अत्र हॉलोग्राम्-द्वारा प्रधानमन्त्रिणः भाषणं श्रूयते दृश्यते च। प्रत्यक्षमेव प्रधानमन्त्री अत्र उपविष्टः इति भासते।

यशिका - सत्यम्, अहम् अपि हॉलोग्रामं दृष्टवती। अनेन दिवङ्गताः नेतारः अपि जीविताः इव दृश्यन्ते।

अथर्वः - अत्र 'वर्धिता-वास्तविकता' (AR) 'आभासीया-वास्तविकता' (VR) च इत्याभ्यां सम्बद्धानि उपकरणानि अपि सन्ति, अनेन ऐतिहासिकवृत्तानि प्रत्यक्षम् इव अनुभूयन्ते। 'भारतीय-स्वतन्त्रता-सङ्ग्रामं' दृष्ट्वा अस्माकं पूर्वजानां संघर्षः कियान् विशालः आसीत् इति ज्ञायते।

भास्करः - अहम् अत्र कृत्रिमबुद्धि-आधारितं संवादयन्त्रं दृष्टवान्। एतत् यन्त्रम् अस्माकं सर्वविधप्रश्नानाम् उत्तराणि ददाति।

वेदिका - अहो! 'डिजिटल्-प्रक्षेपण-चलच्चित्रं' दृष्ट्वा अहं विस्मिता अभवम्। अत्र सम्पूर्णस्य भारतस्य विकास-यात्रा प्रदर्शिता अस्ति।

श्रेया - एषः कश्चन अपूर्वः अनुभवः अस्ति। यश्च चिरकालपर्यन्तं स्मरणीयः भविष्यति।

सर्वे छात्राः - मान्यवर! वयं सर्वे एतस्मिन् सन्दर्भे चर्चा कर्तुम् इच्छामः। किं कक्षां प्रति चलामः?

अध्यापकः - उत्तमः विचारः। चलामः तावत्।

I. एकपदेन उत्तरत -
(i) छात्राः केन प्रधानमन्त्रिणः भाषणं श्रूयते दृश्यते च?
(ii) दिवङ्गताः नेतारः केन जीविता इव दृश्यन्ते?

II. पूर्णवाक्येन उत्तरत -
(i) कः यन्त्रः सर्वविधप्रश्नानाम् उत्तराणि ददाति?
(ii) केन यन्त्रेण सम्पूर्ण भारतस्य विकास यात्रा प्रदर्शिता?

III. निर्देशानुसारम् उत्तरत -
(i) 'अहम् अपि हॉलोग्रामं दृष्टवती।' वाक्येऽस्मिन् क्रिया पदं किम्?
(अ) दृष्टवती (ब) होलोग्राम (स) अपि (द) अहम्
(ii) 'भारतीय-स्वतन्त्रता-संग्रामं' <u>दृष्ट्वा</u> अस्माकं पूर्वजानां संघर्षः कियान् विशाल आसीत्। रेखांकितपदे प्रत्यय अस्ति -
(अ) शतृ (ब) क्त्वा (स) तुमुन् (द) ल्यप्
(iii) वयं सर्वे एतस्मिन् सन्दर्भे चर्चा कर्तुम् इच्छामः। वाक्यऽस्मिन् कर्तृ पदे किम् ?
(अ) वयं (ब) एतस्मिन् (स) सन्दर्भ (द) कर्तुम्

**उत्तर :** I. (i) हॉलोग्रामेन
(ii) होलोग्रामेन
II. (i) कृत्रिमबुद्धि आधारितं संवादयंत्र सर्वविधप्रश्नानां उत्तराणि ददाति।
(ii) डिजिटल प्रक्षेपण चलचित्रेण सम्पूर्ण भारतस्य विकास यात्रा प्रदर्शिता।
III. (i) (अ) दृष्टवती
(ii) (ब) क्त्वा
(iii) (अ) वयं

*** समुचितपदेन रिक्तस्थानानि पूरयत्, येन कथनानां भावः स्पष्टः स्यात्।** **[6]**

77. नवदेहलीस्थ: प्रधानमन्त्रिसङ्ग्रहालय:। अत्र विविधा: डिजिटल् प्रौद्योगिक्य: प्रदर्शिता: सन्ति।
अस्यायं भाव: यत् प्रधानमिन्त्रसङ्ग्रहालयः ____________ स्थित: अस्ति। अस्मिन् ____________ डिजिटल्

प्रौद्योगिक्य: ____________ सन्ति।

**उत्तर :** (i) नवदेहल्यां (ii) विविधाः (iii) प्रदर्शिताः।

78. अस्माकं दैनिकं जीवनं 'डिजिटल' इत्यनेन परिवर्तितं प्रभावितं च भवति।
अस्यायं भाव: यत् अस्माकं दैनन्दिन जीवने ____________ इति अनेन परिवर्तितं ____________ च भवति।

**उत्तर :** (i) डिजिटल (ii) प्रभावितं।

----- -----